| | |
|---|---|
| विषयः (Subject) | संस्कृतम् (Sanskrit) |
| पत्रम् (Paper Number) | 05 |
| पत्रविषयः (Title) | काव्यम्<br>Kavya |
| पाठ्यांशसंख्या पाठ्यांशनाम च<br>(Module Number & Module Name) | 01, मेघदूतम् 1<br>(Study of Meghadutam part1) |
| पाठ्यांशतत्त्वानि<br>(Focal Points of The Module) | • मेघदूतकर्तुः कालिदासस्य परिचयः<br>• कालिदासकृतीनां सामान्यः परिचयः<br>• मेघदूतस्य सामान्यः परिचयः |
| प्रमुखान्वेषकः<br>(Principal Investigator) | सह-प्रमुखान्वेषकः<br>(Co-Principal Investigator) |
| प्रो.रमेशकुमारपाण्डेयः,<br>कुलपतिः, श्रीलालबहादुरशास्त्री-राष्ट्रियसंस्कृतविद्यापीठम्,<br>नवदेहली 110016 | प्रो.वे.कुटुम्बशास्त्री,<br>पूर्वकुलपतिः,राष्ट्रीयसंस्कृतसंस्थानम्,नवदेहली<br>सम्पूर्णानन्दसंस्कृतविश्वविद्यालयः,वाराणसी<br>सोमनाथसंस्कृतविश्वविद्यालयः, गुजरातः |

| | | |
|---|---|---|
| समन्वयकः<br>(Co-ordinator) | पाठ्यांशलेखकः<br>(Content Writer) | समीक्षकः<br>(Reviewer) |
| प्रो. शुकदेवभोइ<br>आचार्यः, साहित्यविभागस्य<br>श्रीलालबहादुरशास्त्रीराष्ट्रिय-संस्कृतविद्यापीठम्, नवदेहली 110016 | प्रो. भागीरथिनन्दः<br>आचार्यः, साहित्यविभागस्य<br>श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृत-विद्यापीठम्, नवदेहली 110016 | प्रो. राधावल्लभत्रिपाठी<br>पूर्वकुलपतिः,<br>राष्ट्रियसंस्कृतसंस्थानम्,<br>नवदेहली |
| पाठ्यांशसंलग्नकम्<br>(Module Tag) | SAN_P5_M1 | |


आयोजकसंस्था (Anchor Institute)

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, नवदेहली 110016

विषयसूची-


१.० प्रस्तावना

२.० संस्कृतसाहित्यस्य महत्त्वम्

३.० संस्कृतसाहित्यकारेषु कालिदासः

३.१ कालिदासस्य समयः

३.२ कालिदासस्य व्यक्तिः

३.३ कालिदासस्य कृतयः

४.० कालिदासकृतीनां सामान्यः परिचयः

४.१ कुमारसम्भवम्

४.२ रघुवंशम्

४.३ अभिज्ञानशाकुन्तलम्

४.४ मालविकाग्निमित्रम्

४.५ विक्रमोर्वशीयम्

४.६ ऋतुसंहारम्

४.७ मेघदूतम्

५.० मेघदूतस्य सामान्यः परिचयः

५.१ मेघदूते वर्ण्यो विषयः

५.२ मेघदूते साहित्यिकतत्त्वानि

५.३ मेघदूते प्रकृतिवर्णनम्

५.४ मेघदूतस्य उत्कर्षः

५.५ विषयसङ्ग्रहः

## १.० प्रस्तावना-

अतिविपुलं किल संस्कृतवाङ्मयम्। चत्वारो वेदाः, षड् वेदाङ्गानि, पुराणानि, दर्शनानि, आयुर्वेदशास्त्रम्, धनुर्वेदः, गान्धर्ववेदः, अर्थशास्त्रम्, कामशास्त्रम् इत्यादीनि सर्वाण्यपि शास्त्राणि संस्कृतवाङ्मये अन्तर्भूतानि अस्य विपुलत्वं प्रमाणयन्ति। किञ्च, संस्कृतवाङ्मयगतं संस्कृतसाहित्यमपि विश्वसाहित्ये प्राचीनतमं विपुलतमं च। वेदाः, पुराणानि, उपनिषदः, रामायणं, महाभारतं, महाकाव्यानि, गद्यकाव्यानि, रूपकाणि, चम्पूकाव्यानि, गीतिकाव्यानि, खण्डकाव्यानि, स्तोत्रकाव्यानि, प्रकीर्णकाव्यानि, मुक्तकानि च संस्कृतसाहित्ये गृहीतानि भवन्ति। अद्यापि बहुप्रकारैः संस्कृतेन विरच्यमानं साहित्यं संस्कृतसाहित्यस्य आयतिं वर्धयति। अतः संस्कृतसाहित्यस्य महत्त्वं सुतरां वरीवर्ति।

## २.० संस्कृतसाहित्यस्य महत्त्वम्-

वेदा एव प्रथमसाहित्यरूपेण परिगण्यन्ते। पुराणसाहित्यस्य सर्ग-प्रतिसर्गादिपञ्चलक्षणत्वं दशलक्षणत्वं च विद्यमानमपि अनेकवर्णनेषु रमणीया साहित्यसुषमा विद्यते। लौकिकसाहित्यस्य प्रथमः अवतारः महर्षिणा वाल्मीकिना एव कृतः। माध्यन्दिनस्नानाय स्वाश्रमात् तमसानदीं प्रति प्रस्थितः वाल्मीकिः व्याधेन व्यापादितं क्रौञ्चमिथुनादेकं भूमिपतितं ददर्श। तं विलोक्य संवेदनया शोकाभिभूतः वाल्मीकिः श्लोकरूपेण इदं जगाद-

**मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।**
**यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥**

इति इदमेव हि रामायणस्थं पद्यं प्रथमं लौकिकं पद्यम्। रामायणमेव प्रथमं लौकिकं साहित्यम्। ततो व्यासस्य कृष्णद्वैपायनस्य महाभारतम्, महाकविभासस्य रूपकाणि, कालिदासस्य काव्यानि, अश्वघोषस्य महाकाव्यानि, एवमपराणि च संस्कृतसाहित्यस्य समुच्चयं वर्धयन्ति। एवं भारवि-माघ-श्रीहर्ष-भट्टि-बाणभट्ट-दण्डि-शूद्रक-भवभूति-

अमरुक-जयदेव-मुरारि-विष्णुशर्म-राजशेखर-क्षेमेन्द्र-रत्नाकरप्रभृतयो बहवः कवयः संस्कृतसाहित्यस्य प्रचुरतां पोषयन्ति। एतादृशानां कवीनां काव्यपठनश्रवणदर्शनादिभिः सहृदयः सहसैव आह्लादितो भवति। एषां कविताकामिनी सहृदयानाम् अनिर्वचनीयकौतुकाय सुतरां प्रभवति। अत एव उक्तं जयदेवकविना-

**यस्याश्चोरश्चिकुरनिकरः कर्णपूरो मयूरो**
**भासो हासः कविकुलगुरुः कालिदासो विलासः।**
**हर्षो हर्षो हृदयवसतिः पञ्चबाणस्तु बाणः**
**केषां नैषा भवति कविताकामिनी कौतुकाय॥**

अद्यापि संस्कृतसाहित्यस्य रचना नानाविधाभिर्निरवधि प्रचलति, साहित्यं च अनुक्रमेण पृथुतां भजते। परन्तु इदमेव सर्वस्वीकृतं यत् कालिदासो हि कविकुलगुरुः, कविषु श्रेष्ठ एव।

## ३.० संस्कृतसाहित्यकारेषु कालिदासः-

कालिदासः न केवलं संस्कृतसाहित्ये अथवा न केवलं भारते प्रसिद्धः अपितु विश्वसाहित्ये, समग्रे विश्वे च सहृदयानां हृदयं कविश्रेष्ठरूपेण अधिरोहति। यद्यपि संस्कृतसाहित्ये भारवि-माघ-श्रीहर्ष-रत्नाकर-भवभूतिसदृशाः कवयः स्वस्वकाव्यवैशिष्ट्यद्वारेण प्रथन्ते, तथापि कालिदासः तेषु अग्रगण्यः वर्तते। कालिदासकवितायाः सकृदपि आस्वादनेन सहृदयः तस्य कवितासौन्दर्यं न विस्मरति। अतः कालिदासस्य श्रेष्ठता निर्विवादा एव। तदुक्तं कालिदासप्रशस्तौ यथार्थतः-

**पुरा कवीनां गणनाप्रसङ्गे**
**कनिष्ठिकाधिष्ठितकालिदासा।**

Pathshala पाठशाला
A Gateway to all Post Graduate Courses

**अद्यापि तत्तुल्यकवेरभावा-**
**दनामिका सार्थवती बभूव॥**

कालिदासकविताया असाधारणत्वं तावदुद्भटस्य उक्तौ यथा-

**कालिदासकविता नवं वयः**
**माहिषं दधि सशर्करं पयः।**
**एणमांसं ललना सुकोमला**
**सम्भवन्तु मम जन्म जन्मनि॥**

### ३.१ कालिदासस्य समयः-

कालिदासस्य स्थितिसमयमादाय विदुषां परस्परम् ऐकमत्यं नास्ति। स्वयमपि कालिदासः स्वस्य निरभिमानितया कुत्रापि आत्मपरिचयं प्रत्यक्षतः परोक्षतः वा न लिखति। अतः समीक्षकाः स्वस्वानुमानेन कालिदासस्य समयं पुरस्कुर्वन्ति। ईशवीयपूर्वद्वितीयशतके कालिदासो बभूवेति प्रसिद्धः समीक्षकः डॉ. कुन्हनराजा अभिप्रयति। ईशातः षड्विंशतिवर्षेभ्यः पूर्वं विक्रमसंवत्संस्थापकः उज्जयिनीनरेशः विक्रमादित्यसंज्ञकः कालिदासस्य आश्रयदाता आसीदिति ईशवीयपूर्वप्रथमशतकमेव कालिदासस्य समय इति केचन वदन्ति। रघुवंशस्थकतिपयश्लोकानामाधारेण कालिदासः ईशवीयतृतीयशतके अभूदिति प्रसिद्धः ज्योतिःशास्त्रविचारकः केतकरमहोदयः। आचार्यके.वी.पाठकमहोदयानुसारेण रघुवंशस्य कतिपयश्लोकानां प्रमाणेन कालिदासः ईशवीयपञ्चमशतके स्थित आसीत्। ईशवीयषष्ठशतकस्थं कालिदासं मन्यन्ते कृष्णमाचार्य-जेम्सफर्ग्युसनप्रमुखा विपश्चितः। द्वितीयचन्द्रगुप्तसमये चतुर्थशतके पञ्चमशतके वा कालिदासः बभूवेति कालिदाससमीक्षकः वासुदेवविष्णुमिराशी ब्रूते। एतादृशानि अनेकमतानि कालिदाससमयनिर्धारणे समीक्षकैः प्रदर्शितानि। परन्तु अद्यापि कालिदासस्य कालनिर्धारणं न स्पष्टतया प्रमाणितं विद्यते।

## ३.२ कालिदासस्य व्यक्तिः-

यद्यपि कालिदासस्य जन्मस्थान-समयादिपरिचयः प्रामाणिकतया सर्वेषामगोचरः, तथापि तस्य व्यक्तिवैशिष्ट्यं नैव सन्दिग्धम्। कालिदासः कस्मिन् कुले उत्पन्नः? कौ तस्य पितरौ? का तस्याऽऽजीविका? कस्तस्य गुरुः? कुतो लब्धा शिक्षा? किमु दाम्पत्यं तेन अङ्गीकृतम्? का तस्य वंशपरम्परा? इत्यादयः प्रश्नाः यद्यपि सम्प्रत्यपि अनुत्तरिताः सन्ति, तथापि कालिदासः श्रुतिस्मृतिसम्मतवैदिकधर्मानुयायी आसीदिति प्रतीयते। प्रतीयतेऽपि यत् स वर्णेन ब्राह्मणः, ऋषीणाम् आश्रमेषु, गुरुकुले वा अधीतवान् आसीत्। तस्य सर्वेषु शास्त्रेषु सूक्ष्मा विचक्षणताऽऽसीत्। सोऽपि निरभिमानः कविः आसीत्। शाकुन्तलादिनाटकेभ्यः तस्य विनोदप्रियता ज्ञातुं शक्यते। भूगोलस्य ज्ञानं तस्य सम्यग् आसीदिति 'मेघदूतम्' एव प्रमाणम्। कुमारसम्भवेऽपि हिमालयस्य यथा वर्णनमस्ति, तत् केवलं न कल्पनाप्रसूतम्, अपितु वास्तविकमेव। कालिदासः शिवस्य उपासकः आसीत्। यतोहि तस्य काव्येषु भगवतः शिवस्य स्तुत्या मङ्गलाचरणं ग्रथितमस्ति। किं बहुना, कुमारसम्भवमहाकाव्यस्य पार्वतीशिवौ एव नायिकानायकौ। अस्य च कवेः श्रेयसि प्रेयसि च समानः पक्षपातः आसीत्।

A Gateway to all Post Graduate Courses

## ३.३ कालिदासस्य कृतयः-

यद्यपि अनेकेषां ग्रन्थानां रचयितृत्वेन कालिदासस्य नाम विद्यते, तथापि सप्त एव कृतयः कालिदासेन रचिता इति समीक्षकाः प्रमाणयन्ति। ताः सप्त यथा-

1. कुमारसम्भवम् (महाकाव्यं सप्तदशसर्गात्मकम्)
2. रघुवंशम् (महाकाव्यम् एकोनविंशतिसर्गात्मकम्)
3. अभिज्ञानशाकुन्तलम् (सप्ताङ्कविशिष्टं नाटकम्)
4. विक्रमोर्वशीयम् (पञ्चाङ्कविशिष्टं नाटकम्)
5. मालविकाग्निमित्रम् (पञ्चाङ्कविशिष्टं नाटकम्)

6. ऋतुसंहारम् (खण्डकाव्यम्)
7. मेघदूतम् (खण्डकाव्यम्)

**४.० कालिदासकृतीनां सामान्यः परिचयः-**

**४.१ कुमारसम्भवम्-** कुमारस्य कार्तिकेयस्य सम्भवः यस्मिन् तत् इति अस्य विग्रहः, इदमेकं महाकाव्यम्। अस्मिन् सप्तदश सर्गाः। अत्र शिवः नायकः, पार्वती च नायिका। अङ्गी रसः शृङ्गारः। पार्वती-शिवयोः प्रणयात् उत्पन्नः कुमारः कार्तिकेयः स्वर्गे उपद्रवकारिणं तारकासुरं हन्तीति अयमेव सङ्क्षिप्तः विषयः अस्य महाकाव्यस्य।

**४.२ रघुवंशम्-** रघोः वंशः वर्णितः यस्मिन् तत् इति अस्य विग्रहः। इदमेकम् ऐतिहासिकं महाकाव्यम्। अस्मिन् एकोनविंशतिसर्गाः। अत्र इक्ष्वाकोः आरभ्य अग्निवर्णं यावत् समेऽपि रघुवंशीया राजानः क्रमेण वर्णिताः सन्ति। अस्मिन् महाकाव्ये दिलीपस्य पुत्रप्राप्तिः, रघोः दिग्विजयः, इन्दुमतीस्वयंवरं, रामचरितं चेत्यादिविषया विशेषतो वर्णिताः सन्ति।

**४.३ अभिज्ञानशाकुन्तलम्-** अभिज्ञानेन गृहीता शकुन्तला यस्मिन् तत् इति विग्रहः। इदमस्ति विश्वप्रसिद्धं नाटकम्। अस्मिन् सप्त अङ्काः। अत्र शकुन्तला-दुष्यन्तयोः प्रणयगाथा नाटकीयशैल्या वर्णिता वर्तते। अत्र नायिका-नायकयोः नाटकादौ मिलनम्, ततो विरहः, अन्ते च पुनर्मिलनम् इति सुखान्तमिदं नाटकम्, शृङ्गारोऽत्र अङ्गी रसः। कण्वः, अनसूया, प्रियंवदा, शार्ङ्गरवः, शारद्वतः, मारीचः इत्यादयः प्रमुखपात्राणि।

४.४ **मालविकाग्निमित्रम्**- मालविका च अग्निमित्रश्च नायिकानायकौ यस्मिन् तत् इति विग्रहः। इदमेव एकं नाटकम्। अत्र विद्यन्ते पञ्चाङ्काः। अत्र मालविकाग्निमित्रयोः नायिकानायकयोः प्रणयः चित्रितो वर्तते। गणदासस्य सङ्गीतशालायां मालविकां विलोक्य अग्निमित्रस्य अनुरागः उत्पद्यते। अन्तिमाङ्के मालविकाऽग्निमित्रयोः विवाहः सम्पद्यते। धारिणी-गणदास-परिचारिका:-विदूषकादयः अत्र अन्यपात्राणि भवन्ति। अङ्गी रसोऽत्र शृङ्गारः। सुखान्तमिदं नाटकम्।

४.५ **विक्रमोर्वशीयम्**- विक्रमश्च उर्वशी च नायकनायिके वर्णिते यस्मिन् तत्। इदमपि एकं नाटकम्। अत्र सन्ति पञ्चाङ्काः। उर्वशी-पुरुरवसोः प्रणयगाथा अत्र वर्णिता। पुरुरवसा दैत्यात् उर्वश्याः रक्षणकारणात् तं प्रति तस्या अनुराग उत्पद्यते। परस्तात् द्वयोः एकः पुत्रः जायते। इन्द्रस्याज्ञया उर्वशी एतस्य जन्मनः समाप्तिं यावत् पुरुरवसः निकटे निवसतीति नाटकमिदं सुखान्तं पर्यवस्यति। अङ्गी रसोऽत्र शृङ्गारः। राक्षस-विद्याधरकुमारी-परिचारिका-इन्द्रादयः अत्र अन्यपात्राणि।

४.६ **ऋतुसंहारम्**- ऋतूनां संहारः समुदायः वर्णितः यस्मिन् तत् इति विग्रहः। ऋतुसंहारम् एकं खण्डकाव्यमस्ति। अत्र ग्रीष्मात् आरभ्य वसन्तं यावत् षण्णां ऋतूनां रमणीयैः पद्यैः वर्णनं विद्यते। वर्णनं च एषामत्यन्तं प्राकृतिकमेव।

४.७ **मेघदूतम्**- मेघ एव दूतः यस्मिन् तत् इति विग्रहः। मेघदूतमपि कालिदासकृतमपूर्वं खण्डकाव्यमेकमस्ति। इदमेव हि अस्मिन् पाठे पठनीयं वस्तु। मेघदूतं पूर्वमेघः, उत्तरमेघश्चेति द्विधा विभक्तम्। पूर्वमेघे 67 पद्यानि, उत्तरमेघे च 55 पद्यानि सन्ति। मेघदूते मेघप्रवाहद्वारेण राष्ट्रस्य समग्रा भौगोलिकी स्थितिः कालिदासेन प्रदर्शिता वर्तते। परन्तु कविः वस्तुविधानं रुचिपूर्णकाल्पनिकदृष्ट्या करोति। यक्षः कश्चिद् कुबेरस्य वर्षभोग्येण

शापेन अलकापुरीस्थया प्रियया विरहित: रामगिरे: आश्रमेषु निवसति। तत्र वर्षर्तौ आषाढस्य प्रथमदिवसे नवीनं मेघमाकाशे वीक्ष्य दूरस्थितायाः प्रियायाः निकटे कुशलसमाचारं प्रापयितुं तमनुरुणद्धि। तस्य मार्गे आगतानां स्थानानां रमणीयं वर्णनमपि तन्मुखेन दर्शयति कवि:।

## ५.० मेघदूतस्य सामान्य: परिचय:-

मेघदूते पूर्वमेघस्थपद्यानि, उत्तरमेघस्थपद्यानि च आहत्य 122 पद्यानि सन्ति। सर्वाणि पद्यानि मन्दाक्रान्ताच्छन्दसा विरचितानि वर्तन्ते। अत्र नायक: यक्ष:, नायिका तु तत्पत्नी यक्षिणी। मेघस्तु सन्देशवाहक:। अत्र मुख्यो रस: विप्रलम्भशृङ्गार:। रीति: वैदर्भी। प्रसादगुणगुम्फिता च रचना। पूर्वमेघभागस्तु विषयवर्णनात्मक:। उत्तरमेघस्तु विरहवर्णनात्मक: रमणीयतर:।

## ५.१ मेघदूते वर्ण्यो विषय:-

कुबेरशापेन प्रियाविरहितस्य रामगिरे: आश्रमेषु वसत: यक्षस्य अलकापुर्यां स्थितां स्वप्रियां प्रति मेघद्वारा कुशलवार्ताप्रेषणमेव मुख्यो वर्ण्यविषय:। अनेन विषयमाध्यमेन कालिदास: भारतीयप्रकृतिसुषमां, मेघस्य मार्गमपि दर्शयितुं प्रयतते इति अयमपि विषय: व्यङ्ग्यरूपेण स्वीकर्तुं शक्यते।

**५.२ मेघदूते साहित्यिकतत्त्वानि**- मेघदूते मुख्यो रस: विप्रलम्भशृङ्गार:। रीति: वैदर्भी। प्रसादश्च गुण:। 'उपमा कालिदासस्य' इति प्रसिद्धा उक्ति:। अत्र बहुषु पद्येषु उपमाऽलङ्कार: प्रयुक्तो विद्यते। तथापि अपरे रूपक-उत्प्रेक्षा- अर्थान्तरन्यास- व्यतिरेक- निदर्शना- दृष्टान्त-अतिशयोक्ति-दीपकादयोऽर्थालङ्कारा: प्रयुक्ता वर्तन्ते। संस्कृतकाव्यजगति अनुपमं विद्यते मेघदूतम्।

**५.३ मेघदूते प्रकृतिवर्णनम्**- कालिदासस्य काव्येषु प्रकृतिवर्णनम् इतरकविकाव्यापेक्षया निरुपमं विद्यते। अस्य काव्येषु गिरि-सागर-नदी-सरोवर-वन-सूर्य-चन्द्र-रात्रि-दिवस-वनस्पति-लता-पशु- पक्षिप्रभृतीनां प्रकृतिगतानां वस्तूनां हृदयावर्जकं चित्रं वर्णितं विद्यते। कालिदासवर्णितायाः प्रकृतेः इदं वैशिष्ट्यं यत् क्वापि प्रकृतिगतं वस्तु देवत्वं, मानवीयभावं च अनुसन्दधाति। मेघदूतेऽपि कालिदासः प्रकृतिमानवयोः व्यवहारसाम्यं प्रदर्शयन् प्रकृतिं सजीवां प्रतिपादयति। तत्र यक्षः मेघम् उपदिशति त्वमवश्यं प्रियसखं रामगिरिमालिङ्ग्य आपृच्छस्व, यः रामगिरिः तव विरहजन्यमुष्णं वाष्पं चिराय मुञ्चतीति। तदिदं पद्यं यथा-

**आपृच्छस्व प्रियसखममुं तुङ्गमालिङ्ग्य शैलं**
**वन्द्यैः पुसां रघुपतिपदैरङ्कितं मेखलासु।**
**काले काले भवति भवतो यस्य संयोगमेत्य**
**स्नेहव्यक्तिश्चिरविरहजं मुञ्चतो वाष्पमुष्णम्।।** (मेघदूतम्-12)

एवमपि निर्जीवमाम्रकूटपर्वतं पृथिवीनायिकायाः स्तनमण्डलमिव वर्णयन् कालिदासः प्रकृतेः मानवीकरणे यत्नवान् कविः स्पष्टं प्रतीयते। तत् पद्यमेवं यथा-

**छन्नोपान्तः परिणतफलद्योतिभिः काननाम्रै-**
**स्त्वय्यारूढे शिखरमचलः स्निग्धवेणीसवर्णे।**
**नूनं यास्यत्यमरमिथुनप्रेक्षणीयामवस्थां**
**मध्ये श्यामः स्तन इव भुवः शेषविस्तारपाण्डुः।।**

(मेघदूतम्-118)

एवम्भूतानि अनेकानि उदाहरणानि मेघदूते वर्तन्ते। जिज्ञासवः स्वयं तानि उन्नेतुं शक्नुवन्ति।

**५.४ मेघदूतस्य उत्कर्षः**- 'माघे मेघे गतं वयः' इति मल्लिनाथस्य उक्तिः मेघदूतस्य प्रशस्तिं प्रस्तौति। मेघदूतस्य काव्यसौष्ठवमनुपमम्। कुबेरशापेन पत्नीवियुक्तस्य यक्षस्य

मेघद्वारा सन्देशप्रेषणं विषयीकृत्य रचितमिदं खण्डकाव्यं विप्रलम्भशृङ्गारस्य निरुपमसुषमां पुरस्करोति। सोऽयं विप्रलम्भशृङ्गारोऽत्र परमं परिपोषं प्राप्त इति दृश्यते। उत्तरमेघे अस्य प्रकृष्टानि उदाहरणानि बहूनि प्राप्यन्ते। पत्नीविरहेण अतिभावविह्वलतया अक्षिभ्यां सद्यः अश्रुपातं यक्षस्य वर्णयन् एवं लिखति कविः-

**त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया-**
**मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।**
**अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे**
**क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥**

(मेघदूतम्-42)

कवित्वस्य नितान्तमौलिकतायाः पराकाष्ठा मेघदूते राजते। अत्र कालिदासेन ग्रथिताः सूक्तयोऽप्यनन्याः। तथाहि-

1) आशाबन्धः कुसुमसदृशं प्रायशो ह्यङ्गनानां। सद्यःपाति प्रणयिहृदयं विप्रयोगे रुणद्धि।
2) कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु।
3) आपन्नार्तिप्रशमनफलाः प्रायशो ह्युत्तमानाम्।
4) के वा न स्युः परिभवपदं निष्फलारम्भयत्नाः।
5) याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा।
6) रिक्तः सर्वो भवति हि लघु पूर्णता गौरवाय।
7) स्त्रीणामाद्यं प्रणयवचनं विभ्रमो हि प्रियेषु।
8) कस्यात्यन्तं सुखमुपनतं दुःखमेकान्ततो वा। नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।

एवमन्या अपि शिक्षाप्रदाः सूक्तयो मेघदूते वर्तन्ते। मन्दाक्रान्ताच्छन्दसा रचितत्वात् मेघदूतस्य गेयताऽपि सद्यः सहृदयमनोग्राह्या भवति। नगराणां, नदीनां, स्थलानां, पर्वतानां च वर्णनं नूनमेव अनितरसाधारणतां धत्ते। मेघदूतं निर्व्याजस्य निश्छलस्य च प्रेम्णः उपदेशं

ददाति। परस्परमतिशयविरहेऽपि यक्षमिथुनस्य संयमभङ्गो न भवति। मेघदूते शृङ्गाररससमावेशेऽपि मध्ये मध्ये देवनदीनां, शिव-स्कन्द-कृष्ण- बलरामादिदेवाना-मानुषङ्गिकवर्णनाकारणात् आध्यात्मिकतायाः स्पर्शोऽपि अनुभवितुं शक्यते। गुणालङ्काररीतीनां यः समुचितः प्रयोगो मेघदूते दृश्यते, तेन तस्य उत्कर्षः प्रगुणीभवति। मानवसंवेदनायाः प्रकृष्टप्रमाणभूतोऽयं ग्रन्थ इति नास्ति संशयः।

**५.५ विषयसङ्ग्रहः-**

एवं मेघदूतखण्डकाव्यस्य पाठ्यवस्तुपठनात् पूर्वं मया अस्य परिचयः, अस्य कर्तुश्च परिचयः सामान्यतः अत्र उपस्थापितः। यद्यपि परिचये अपरेऽपि अनेके विषयाः सम्मेलयितुं शक्यन्ते, तथापि समयानुरोधेन एतावन्मात्रं समुपस्थाप्य जिज्ञासून् इतोऽप्यधिकान् सन्दर्भान् तत्तद्ग्रन्थेभ्यः ग्रहीतुमुत्प्रेरयामि। एतावता सामान्यपरिचयेन प्रकृते पाठ्ये पाठका उन्मुखीभवेयुरिति आशासे। पाठकाः परस्तात् प्रदत्तान् सन्दर्भग्रन्थान् अपि स्वबोधवर्धनाय पठितुं शक्नुवन्ति।

A Gateway to all Post Graduate Courses